# चेत् , नो चेत्

## “चेत्” इति अव्ययम् ।

चेत् = If.

**The word ‘चेत्’ is added to the verb in Present Tense to express ‘if it is’, ‘were it to happen’, or ‘had it occurred’.**

उदाहरणम् -

अस्ति **चेत्**  = If it is

नो **चेत्** = If not

यथा ---

गीतापुस्तकं गृहे अस्ति **चेत्** पठामि।

आपणे आलुकम् अस्ति **चेत्** आनयतु।

अभ्यासं करोति **चेत्** छात्रः उत्तीर्णः भवति।

**“यदि - तर्हि” इति पदद्वयं यस्मिन् अर्थे उपयुज्यते तस्मिन् एव अर्थे “चेत्” इत्यस्य अपि उपयोगः करणीयः |**

उदा - समयः अस्ति चेत् अहम् आगच्छामि |

(यदि समयः अस्ति तर्हि अहम् आगच्छामि इत्यर्थः |)

**“यदि - तर्हि”, “चेत्” इत्येतयोः अर्थः समानः इत्यतः “यदि - तर्हि” इति यत्र प्रयुक्तम् अस्ति वाक्ये, तत्र “चेत् “इति न प्रयोक्तव्यम् |**

उदा - **यदि** समयः अस्ति **चेत् तर्हि** अहम् आगच्छामि - इत्येतत् वाक्यम् **अशुद्धं** | यतः “चेत्” इति यत्र अस्ति तत्र यदि इत्यपि प्रयुक्तम् |

## अभ्यासः

**१. अधः एकैकेन वाक्येन एकैकः सन्दर्भः निर्दिष्टः अस्ति । तस्मिन् सन्दर्भे भवन्तः किं कुर्वन्ति इति "चेत्" युक्तेन वाक्येन लिखतु।**

उदा - कार्यालयस्य विरामः भवति ।

कार्यालयात् विरामः भवति **चेत्** गृहं गच्छामि ।

1. गृहे कोपि नास्ति ।

.....................................................................|

2.कोषे धनं नास्ति ।

..................................................................... |

3.गृहे अतिथिः आगच्छति ।

.....................................................................|

4.बालकाः कोलाहलं कुर्वन्ति ।

.....................................................................|

5.नगरयानानि न सञ्चरन्ति।

.....................................................................|

6.स्यूतः नष्टः भवति ।

.....................................................................|

7.अधिकारी तर्जयति ।

.....................................................................|

8.चोराः आगच्छन्ति ।

.....................................................................|

9. पाके रुचिः न भवति ।

.....................................................................|

10. रात्रौ निद्रा न आगच्छति ।

.......................................................................।

**अभ्यासः**

**२. अधस्तनवाक्येषु स्थितानि रिक्तस्थानानि "चेत् - नो चेत्" इत्येतेषु केनचित् पदेन पूरयतु।**

उदा-

भवान् शीघ्रम् आगच्छतु । ............... पिता तर्जयति ।

भवान् शीघ्रम् आगच्छतु । नो **चेत्** पिता तर्जयति ।

1. औषधं स्वीकरोतु । ..................ज्वरः वर्धते ।
2. इच्छा अस्ति ।......................भोजनं करोतु ।
3. अध्यापकः अस्ति | ...............कक्ष्यायाम् उपविशामि।
4. भवान् मधुरं खादति | ............ दन्ताः नश्यन्ति ।
5. भवान् असत्यं वदति।............कः भवतः विश्वासं करोति ।
6. परश्वः भवतः गृहम् आगमिष्यामि । ...................प्रपरश्वः ।
7. सम्यक् पठतु । ...............उत्तीर्णता कथं प्राप्येत ?
8. सुरेशः आगच्छति .....................माम् आह्वयतु ।
9. दैवम् अनुकूलकरं नास्ति। ............... कः किं कुर्यात् ।
10. उपविश्य पठतु ।........................उत्थाय पठतु ।